Seat No. _______________

# HAJ-1901100102030700

## M. A. (Sem.-III) (CBCS) Examination

**May - 2023**

## CCT-07 : Sanskrit

*(Unseen, Essay and Meghadut - पूर्वमेघ : १ से २०)*

*(New Course)*

Time : $2\frac{1}{2}$ Hours / Total Marks : **70**

१ નીચેનામાંથી કોઈપણ **એક** ગદ્યખંડનો અનુવાદ કરો : १४

1 Translate any **one** of the following passages : **14**

(१) भरतमुनिप्रयोगं द्रष्टुमना महेन्द्र उर्वशीं ससखीमाहूय प्रयोगप्रदर्शनायादिदेश । तथा च तस्य पुरतः सरस्वतीकृतलक्ष्मीस्वयंवरनामके काव्यबन्धेऽभिनीयमाने तेषु तेषु रसेषु परिषत्तन्मय्यासीत् । किन्तु भवितव्यतानुविधायिनीन्द्रियाणीति वचनानुरोधादुर्वश्या वचनमेकस्मिन्स्थले प्रमादस्खलितमासीत् । यतो लक्ष्मीभूमिकायां वर्तमानोर्वशी वारुणीभूमिकायां वर्तमानया मेनकया पृष्टा कतमस्मिंस्ते भावाभिनिवेश इति । ततस्तया पुरुषोत्तम इति भणितव्ये पुरूरवसीति निर्गता वाणी । तां श्रुत्वा भरतः क्रुद्धस्तां शशाप – येन ममोपदेशस्त्वया लङ्घितस्तेन न ते दिव्यं स्थानं भविष्यितीति । यस्मिन्बद्धभावासि तं मम प्रियमित्रं पुरूरवसमुपतिष्ठस्व यावत्स दृष्टसन्तानो भवेदिति महेन्द्रेण पुनरनुगृहीता सा ।

(२) अस्त्युज्जयिनीवर्त्मप्रान्तरे प्लक्षतरुः । तत्र हंसकाकौ निवसतः । कदाचिद् ग्रीष्मसमये परिश्रान्तः कश्चित्पथिकस्तत्र तरुतले धनुष्काण्डं संनिधाय सुप्तः । तत्र क्षणान्तरे तन्मुखाद् वृक्षच्छायापगता । ततः सूर्यतेजसा तन्मुखं व्याप्तमवलोक्य तद्वृक्षस्थितेन पुण्यशीलेन शुचिना राजहंसेन कृपया पक्षौ प्रसार्य पुनस्तन्मुखे छाया कृता । ततो निर्भरनिद्रासुखिना पथिभ्रमणपरिश्रान्तेन पान्थेन मुखव्यादानं कृतम् । अथ परसुखमसहिष्णुः स्वभावदौर्जन्येन स काकस्तस्य मुखे पुरीषोत्सर्गं कृत्वा पलायितः । ततो यावदसौ पान्थ उत्थायोर्ध्वं निरीक्षते तावत्तेनावलोकितो हंसः धनुष्काण्डेन हतो, व्यापादितः । अतोऽहं ब्रवीमि ''दुर्जनेन समं न स्थातव्यम्'' इति ।

૨ નીચેનામાંથી કોઈપણ **બે**નો અનુવાદ કરો : **૧૪**

**2** Translate any **Two** of the following : **14**

(૧) आत्मा त्वं गिरिजा मतिः सहचराः प्राणाः शरीरं गृहं
पूजा ते विषयोपभोगरचना निद्रा समाधिः स्थितिः ।
सञ्चारः पदयोः प्रदक्षिणविधिः स्तोत्राणि सर्वा गिरो
यद्यत्कर्म करोति तत्तदखिलं शम्भो तवाराधनम् ॥

(૨) कस्त्वं शूली मृगय भिषजं नीलकण्ठ प्रियेऽहं
केकामेकां कुरु पशुपतिर्नैव दृश्ये विषाणे ।
स्थाणुर्मुग्धे न वदति तरुर्जीवितेशः शिवाया
गच्छाटव्यामिति हतवचाः पातु वश्चन्द्रचूडः ॥

(૩) व्याघ्रः सेवति काननं सुगहनं सिंहो गुहां सेवते
हंसः सेवति पद्मिनीं कुसुमितां गृध्रः श्मशानस्थलीम् ।
साधुः सेवति साधुमेव सततं नीचोऽपि नीचो जनं
या यस्य प्रकृतिः स्वभावजनिता केनापि न त्यज्यते ॥

(૪) दग्धं खाण्डवमर्जुनेन बलिना दिव्यैर्द्रुमैः सेवितं
दग्धा वायुसुतेन रावणपुरी लङ्का पुनः स्वर्णभूः ।
दग्धः पञ्चशरः पिनाकपतिना तेनाप्ययुक्तं कृतं
दारिद्र्यं जनतापकारकमिदं केनापि दग्धं न हि ॥

૩ નીચેનામાંથી કોઈપણ **એક**નો સંસ્કૃતમાં અનુવાદ કરો : **૧૪**

**3** Translate into Sanskrit any **One** of the following : **14**

(૧) હવે દુષ્યન્ત અનુતાપથી પ્રજ્વળે છે. આ અનુતાપ એ જ તપસ્યા. આ અનુતાપ વિના શકુન્તલાને પ્રાપ્ત કરવામાં શકુન્તલા પ્રાપ્તિનું કોઈ ગૌરવ જ ન હતું. યૌવનમત્તતાના આકસ્મિક તોફાનમાં શકુન્તલાને એક ઘડીમાં ઉઠાવી લીધી, તેથી તે સંપૂર્ણ રીતે મળી ન જાય. પ્રાપ્તિનો ઉત્કૃષ્ટ માર્ગ સાધના છે, તપસ્યા છે. જે અનાયાસે હાથમાં આવ્યું હતું તે અનાયાસે જ હાથમાંથી જતું રહ્યું. તેથી જ એકબીજાને યથાર્થ રીતે ચિરકાળ માટે તેઓ પામે તે સારુ કવિ દુષ્યન્ત શકુન્તલા પાસે દીર્ઘ-દુઃસહ તપસ્યા કરાવે છે. રાજસભામાં પ્રવેશ કરતાંની સાથે જ દુષ્યન્તે શકુન્તલાનો સ્વીકાર કર્યો હોત તો શકુન્તલા તેના અન્તઃપુરમાં એક ખૂણે સ્તાન પામત અને તેનું અવશિષ્ટ જીવન અનાદરમાં, દુઃખમાં અને નિરર્થક રીતે પસાર કર્યું હોત.

(1) Dushyanta is now consumed by remorse. This remorse is tapasya. So long as Shakuntala was not won by means of this repentance, there was no glory in winning her. One sudden gust of youthful impulse had in a moment given her up to Dushyanta, but that was not the true, the full winnig of her. The best mens of winning by devotion, by tapasya. What is easily gained is as easily lost. Therfore, the poet has made the tow lovers undergo long and austere tapasya that they may gain each other truly etemally. If Dushyanta had accepted Shakuntala when she was first brought to his court, she would have only occupied a corner of the royal household, and passed the rest of her life in neglect, gloom and uselessness.

(૨) પોરબંદરથી પિતાજી રાજસ્થાનિક કોર્ટના સભ્ય થઈ રાજકોટ ગયા ત્યારે મારી ઉંમર સાતેક વર્ષની હશે. રાજકોટની ગામઠી શાળામાં મને મૂકવામાં આવ્યો. એ શાળાના દિવસો મને સારી પેઠે યાદ છે. મહેતાજીઓનાં નામઠામ પણ સારી રીતે યાદ છે. જેમ પોરબંદરના તેમ ત્યાંના અભ્યાસને વિશે પણ ખાસ જાણવા જેવું નથી. હું ભાગ્યે સામાન્ય કોટિનો વિદ્યાર્થી ગણાતો હોઈશ. ગામઠી નિશાળમાંથી પરાની નિશાળમાં ને ત્યાંથી હાઈસ્કૂલમાં. આટલે સુધી પહોંચતાં મને બારમું વર્ષ વીતી ગયું. ત્યાં લગી મેં કોઈ પણ વેળા શિક્ષકોને છેતર્યાનું મને સ્મરણ નથી. નથી કોઈ મિત્રો કર્યાનું સ્મરણ. હું અતિશય શરમાળ છોકરો હતો.

(2) I must have been about seven when my father left Porbandar for Rajkot to become a member of the Rajasthanik Court. There I was put into a primary school, and I can well recollect those dasy, including the names and other particulars of the teachers who tought me. As at Porbandar, so here, there is hardly anything to note about my studies. I could only have been a mediocre student. From this school I went to the suburban school and thence to the high school, having already reached my twelfth year. I do not remember having ever told a lie, during this short period, either to my teachers or to my school-mates. I used to be very shy.

૪ નીચેનામાંથી કોઈપણ **એક** પર સંસ્કૃતમાં નિબંધ લખો : **૧૪**

**4** Write an essay in Sanskrit on any **One** of the following : **14**

(१) गीता सुगीता कर्तव्या ।

(२) विद्याधनं सर्वधनप्रधानम् ।

(३) कविकुलगुरुः कालिदासः ।

(४) संस्कृतसाहित्ये भारतवर्षगौरवम् ।

૫ નીચેનામાંથી કોઈપણ **બે** શ્લોક પર મલ્લિનાથની ટીકાને અનુસરીને સંસ્કૃતમાં વિવરણ કરો : **૧૪**

**5** Write a description in Sanskrit on any **two** of the following according to the commentary of Mallinatha. **14**

(१) तस्मिन्नद्रौ कतिचिदबलाविप्रयुक्तः स कामी
नीत्वा मासान्कनकवलयभ्रंशरिक्तः प्रकोष्ठः ।
आषाढस्य प्रथमदिवसे मेघमाश्लिष्टसानुं
वप्रक्रीडापरिणतगजप्रेक्षणीयं ददर्श ॥ २ ॥

(२) धूमज्योतिःसलिलमरुतां सन्निपातः क्व मेघः
सन्देशार्थाः क्व पटुकरणैः प्राणिभिः प्रापणीयाः ।
इत्यौत्सुक्यादपरिगणयन् गुह्यकस्तं ययाचे
कामार्ता हि प्रकृतिकृपणाश्चेतनाचेतनेषु ॥ ५ ॥

(३) तां चावश्यं दिवसगणनातत्परामेकपत्नी–
मव्यापन्नामविहतगतिर्द्रक्ष्यसि भ्रातृजायाम् ।
आशाबन्धः कुसुमसदृशो प्रायशो ह्यङ्गनानां
सद्यः पाति प्रणयिहृदयं विप्रयोगे रुणद्धि ॥ १० ॥

(४) रत्नच्छायाव्यतिकर इव प्रेक्ष्यमेतत्पुरस्ता–
द्वल्मीकाग्रात्प्रभवति धनुःखण्डमाखण्डलस्य ।
येन श्यामं वपुरतितरां कान्तिमापत्स्यते ते
बर्हेणैव स्फुरितरुचिना गोपवेषस्य विष्णोः ॥ १५ ॥

---